हिमालयः भारतस्य उत्तरदिशायां स्थितः अस्ति। अस्य शिखराणि सर्ववर्षम् हिमेन आच्छादितानि सन्ति अतएव तु अयम् हिमस्य आलयः इति हिमालयः भवति। ग्रीष्मस्य तापेन तप्ताः जनाः प्रतिवर्षं ग्रीष्मे तत्र गच्छन्ति। अनेके रुग्णाः जनाः अपि तस्य पवित्रे वातावरणे स्वस्थाः भवन्ति। अत्र अनेकानि दर्शनीयानि स्थानानि अपि सन्ति। प्रतिवर्षम् भक्ताः अत्र आगच्छन्ति। बद्रीनाथे केदारनाथे च मन्दिरेषु ईश्वरस्य दर्शनं कुर्वन्ति। हिमालयात् एव गंगा, शतद्रुः चन्द्रभागा इत्यादयः नद्यः प्रवहन्ति। हिमालयः प्रहरी इव भारतं रक्षति। अस्य रक्षणे एव भारतस्य रक्षणम्।

## I. एकपदेन उत्तरत।

(एक पद में उत्तर दीजिए।)

(क) भारतस्य उत्तरदिशायां कः अस्ति? ..............................................

(ख) तापेन तप्ताः जनाः कुत्र गच्छन्ति? ..............................................

(ग) हिमालये कानि स्थानानि सन्ति? ..............................................

(घ) अस्य रक्षणे कस्य रक्षणम्? ..............................................

## II. पूर्णवाक्येन उत्तरत।

(पूर्णवाक्य में उत्तर दीजिए।)

(क) हिमालयः कुत्र स्थितः अस्ति?

..............................................................................................

(ख) भक्ताः मन्दिरेषु कस्य दर्शनं कुर्वन्ति?

..............................................................................................

## III. उचितं मेलनम् कुरुत।

(उचित मिलान कीजिए।)

| | |
|---|---|
| | (*i*) धूप से |
| (क) शतद्रुः | (*ii*) ढकी हुई |
| (ख) रुग्णाः | (*iii*) बीमार |
| (ग) तापेन | (*iv*) सतलुज |
| (घ) आच्छादितानि | |